# લિઙ્ગાષ્ટકમ્

બ્રહ્મમુરારિસુરાર્ચિતલિઙ્ગમ્ નિર્મલભાસિતશોભિતલિઙ્ગમ્ ।
જન્મજદુઃખવિનાશકલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવલિઙ્ગમ્ ।। ૧।।
દેવમુનિપ્રવરાર્ચિતલિઙ્ગમ્ કામદહ્મ્ કરુણાકર લિઙ્ગમ્ ।
રાવણદર્પવિનાશનલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૨।।
સર્વસુગન્ધિસુલેપિતલિઙ્ગમ્ બુદ્ધિવિવર્ધનકારણલિઙ્ગમ્ ।
સિદ્ધસુરાસુરવન્દિતલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૩।।
કનકમહામણિભૂષિતલિઙ્ગમ્ ફનિપતિવેષ્ટિત શોભિત લિઙ્ગમ્ ।
દક્ષસુયજ્ઞ વિનાશન લિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૪।।
કુઙ્કુમચન્દનલેપિતલિઙ્ગમ્ પઙ્કજહારસુશોભિતલિઙ્ગમ્ ।
સચિતપાપવિનાશનલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૫।।
દેવગણાર્ચિત સેવિતલિઙ્ગમ્ ભાવૈર્ભક્તિભિરેવ ચ લિઙ્ગમ્ ।
દિનકરકોટિપ્રભાકરલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૬।।
અષ્ટદલોપરિવેષ્ટિતલિઙ્ગમ્ સર્વસમુદ્ભવકારણલિઙ્ગમ્ ।
અષ્ટદરિદ્રવિનાશિતલિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૭।।
સુરગુરુસુરવરપૂજિત લિઙ્ગમ્ સુરવનપુષ્પ સદાર્ચિત લિઙ્ગમ્ ।
પરાત્પરં પરમાત્મક લિઙ્ગમ્ તત્ પ્રણમામિ સદાશિવ લિઙ્ગમ્ ।। ૮।।
લિઙ્ગાષ્ટકમિદં પુણ્યં યઃ પઠેત શિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ।।

।। ૐ તત્ સત્ ।।